## नद्यादिभ्यो ढक्। (९७/१३१७)

नदी इत्येवमादिभ्यो ढक् प्रत्ययो भवति। नादेयम्। माहेयम्। पूर्वनगरीशब्दोऽत्र पठ्यते। [1]पौर्व-नगरेयम्। केचित्तु पूर्वनगिरी इति पठन्ति, विच्छिद्य च प्रत्ययं कुर्वन्ति, पौरेयम्, [2]वानेयम्, गैरेयम् इति। तदुभयमपि दर्शनं[3] प्रमाणम्।

नदी। मही। वाराणसी। [4]श्रावस्ती। [5]कौशाम्बी। [6]नवकौशाम्बी। [7]काशफरी। खादिरी। पूर्वनगरी। पावा। मावा। साल्वा। [8]दार्वा। [9]दाल्वा। [10]वासेनकी। 'बडवाया वृषे' (ग. सू. ९५)॥

## दक्षिणापश्चात्पुरसस्त्यक्। (९८/१३१८)

दक्षिणा पश्चात् पुरस् इत्येतेभ्यः त्यक् प्रत्ययो भवति शैषिकः। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः॥

## कापिश्याः ष्फक्। (९९/१३१९)

[11]कापिशीशब्दात् ष्फक् प्रत्ययो भवति शैषिकः। षकारो ङीषर्थः। कापिशायनं मधु। कापिशायनी द्राक्षा।

[४३३] बाह्ल्युर्दिपर्दिभ्यश्चेति वक्तव्यम्। (म. भा. २.२९२)
बाह्लायनी। और्दायनी। [12]पार्दायनी॥

## रङ्कोरमनुष्येऽण् च। (१००/१३२०)

रङ्कुशब्दाद् अण् प्रत्ययो भवति, चकारात् ष्फक् च शैषिकोऽमनुष्येऽभिधेये। राङ्कवो [13]गौः, राङ्कवायणो गौः। अमनुष्ये इति किम्? [14]राङ्कवको मनुष्यः (म. भा. २.२९२)।

ननु च रङ्कुशब्दः कच्छादिषु पठ्यते, तत्र [15]च 'मनुष्यतत्स्थयोर्वुञ्' (४.२.१३४/१३५८) इति मनुष्ये परत्वाद् वुञैव भवितव्यं, [16]कच्छादिपाठाद[17]मनुष्ये अणपि सिद्धः, किमिह [18]मनुष्यप्रतिषेधेन[19]अण्ग्रहणेन च? तदुच्यते, नैवायं मनुष्यप्रतिषेधः, किं [20]तर्हि, नञिवयुक्तन्यायेन मनुष्यसदृशे प्राणिनि[21] प्रतिपत्तिः क्रियते। तेन राङ्कवः कम्बलः इति[22] ष्फक् [23]न भवति। विशेषविहितेन च ष्फका अणो बाधा मा [24]भूत् इत्यण्ग्रहणमपि[25] क्रियते॥

## द्युप्रागपागुदक्प्रतीचो यत्। (१०१/१३२१)

दिव् प्राच् अपाच् उदच् प्रत्यच् इत्येतेभ्यो यत् प्रत्ययो भवति शैषिकः। दिव्यम्। प्राच्यम्। [26]अपाच्यम्। उदीच्यम्। प्रतीच्यम्[27]। अव्ययात्तु कालवाचिनः परत्वात् ट्युट्युलौ[28] भवतः। प्राक्तनम्॥

---

1. पूर्वनगरेयम् ह. 2. वानेयम् नास्ति ह. 3. भवति इत्यधिकम् क. 4. आवन्ती क. 5. नास्ति ह. 6. नास्ति क. ब. 7. कायफली शादिनी क. फ, सैकती ह. 8. नास्ति ब, दर्वा फ. 9. नास्ति ब. क. 10. सेनकी ब. फ. 11. कपिशशब्दात् ह. 12. नास्ति ब, पार्दायणी ह. 13. गौः नास्ति फ. 14. राङ्कवः ह. 15. च नास्ति फ. 16. कच्छादिषु ब. क. 17. अमनुष्ये नास्ति क. ड. फ. ह. 18. मनुष्यस्य प्रतिषेधेन ब. क. 19. वा इत्यधिकम् ब. 20. तर्हि नास्ति फ. 21. इति फ. 22. अप्राणिनि कच्छादिपाठादण् इत्यधिकम् 23. न नास्ति ब. 24. विज्ञायि फ. 25. अपि नास्ति फ. 26. अवाच्यम् फ. ह. 27. भसंज्ञायामञ्चतेः उत् ईत् इति ईकारादेशः। अच इति अञ्चतेः अकारलोपः चादिति दीर्घः इत्यधिकम् ब. 28. एव प्रत्ययौ इत्यधिकम् ड.